14-10-2020

## शास्त्री

साहित्य ।

### छन्दविचार: ।

" सर्वथा व्यवहर्तव्यं, कुतो ह्यवचनीयता ।
यथा स्त्रीणां तथा वाचां, साधुत्वे दुर्जनो जनः ॥ "

गणादि निर्णय →

सर्वथा व्यवहर्तव्यम् ,
S I S (रगण) I I S S (सगण) S

कुतो ह्यवचनीयता ।
I S I (जगण) I I S (सगण) I S

यथा स्त्रीणां तथा वाचां , साधुत्वे दुर्जनो जनः ॥
I S S (यगण) S I S (रगण) S S     S S S (मगण) S I S (रगण) I S

इस पद्य को देखने पर पता चलता है कि इसके प्रत्येक पाद में आठ अक्षर हैं। जिसके प्रत्येक पाद में प्रारंभ से पाँचवाँ अक्षर लघु है। छठा अक्षर गुरु है। दूसरे तथा चौथे पाद का सातवाँ अक्षर ह्रस्व (लघु) है। पहले तथा तीसरे पाद का सातवाँ अक्षर गुरु है। यह लक्षण अनुष्टुप् छन्द यानि श्लोक का है। लक्षण है →

श्लोके षष्ठं गुरुज्ञेयं, सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घं मन्ययोः ।

14-10-2020

डॉ० निर्मल कुमार झा ( स० प्राचार्य )
रा० उ० सं० महावि० सुखसेना , पूर्णियाँ

संस्कृतसामान्यम् । उपशास्त्री ॥ 14-10-2020

अनिवार्यप्रश्नपत्रम् ।

निबन्धः ।

" विद्याधनं सर्वधनप्रधानम् । किं किं न साधयति कल्पलतेव विद्या । उत्तमं हि धनं विद्या दीयमानं न हीयते । विद्या ददाति विनयम् । विद्ययाऽमृतमश्नुते ।"

अस्मिन् संसारे धनमेव सारं मन्यमाना उद्योगेन, भाग्येन, व्यापारेण, सेवया च धनमुपार्जयन्तो जनाः जर्जरतां यान्ति तथापि उपार्जितं धनं मनसस्तोषाय न जायते । भाग्यहीनाः यदि कथञ्चित् कुत्रचित् धनसंग्रहे सफला अपि भवन्ति तदनु तेषां तद्धनं राजा कररूपेण, पुत्रादयः बान्धवाश्च दायभागरूपेण गृह्णन्ति । चौराः चौर्यं कृत्वा, लुण्ठकाः लुण्ठयित्वा तत्सर्वं बलात् नयन्ति । इयं लक्ष्मी चञ्चला न क्वापि स्थिरत्वम्-उररीकरोति । एतदतिरिक्तम् अनुपममेकं धनं यद् उपर्युक्तदोषैः सर्वथा रहितं वर्तते तदस्ति विद्याधनम् ।

" न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनं प्रधानम् ॥"

'व्यये कृते वर्धत एव नित्यम्', इति विशेषता केवलं विद्याधनस्य विलोक्यते न चान्यस्य क्वापि श्रुतिविषयम्-आगच्छति ।

" अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारती ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥" इति व्यतिरेकालङ्कारवर्णनमुखेन कविना विद्याधनस्य संस्तवः प्रतिपादितः । अमूल्यम्, आहार्यम्, अक्षयञ्च धनं विद्याधनम् । न च एतस्य किमपि अन्यद्धनं तुलनाम्-अधिरोहति । अतएव साधूक्तम् → "विद्यानाम नरस्य रूपमधिकम् ।"

क्रमशः —

14-10-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

14-10-2020

संस्कृतसामान्यम् ।  उपशास्त्री I

अनिवार्यप्रथमपत्रम् ।

## सन्धिविच्छेदं कुरुत ।

| | | |
|---|---|---|
| लोकापवादः – | लोक + अपवादः – | दीर्घस्वरसन्धिः |
| दुर्जनः – | दुः + जनः – | विसर्गः |
| अत्यन्तम् – | अति + अन्तम् – | यण् |
| निश्चयस्याभावः – | निः + चयस्य + अभावः – | विसर्गः + स्वर दीर्घ |
| ह्यवचनीयता – | हि + अवचनीयता – | यण् |
| रात्रिरेव – | रात्रिः + एव – | विसर्गः |
| रघुकुलानन्दः – | रघुकुल + आनन्दः – | दीर्घः |
| देवाश्रयः – | देव + आश्रयः – | दीर्घः |
| उत्कृष्टांशे – | उत् + कृष्ट + अंशे – | हल् + स्वर (दीर्घ |
| कथमपि – | कथम् + अपि – | हल् |
| केनापि – | केन + अपि – | दीर्घः |
| विषमिव – | विषम् + इव – | हल् |
| दुर्मुखः – | दुः + मुखः – | विसर्गः |
| किमाश्चर्यमिदम् – | किम् + आश्चर्यम् + इदम् – | हल् |
| उद्धृतम् – | उत् + हृतम् – | हल् |
| निष्कामम् – | निः + कामम् | विसर्गः |
| अधिष्ठितः – | अधि + स्थितः – | हल् |
| युधिष्ठिरः – | युधि + स्थिरः – | हल् |
| तत्त्वमसि – | तत् + त्वम् + असि | हल् |
| तामेव – | ताम् + एव – | हल् |
| उपालम्भः – | उप + आलम्भः – | दीर्घः |

(signature) 14-10-2020

डॉ० निर्मल कुमार झा (सह प्राचार्य
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ